वैकृतञ्च। यथा। अतिशीलितपारुष्यमभिशिक्षितवैकृतमित्यभिनन्दः। द्वयमिदं रसे क्लीवम्। तदालम्बने तु मांसशोणितादौ त्रिषु। इति तट्टीकायां भरतः॥

वीभत्सुः, पुं, (वीभत्सतीति। वध+सन्+उ। युद्धे न्यायपथेन शत्रुहननादस्य तथात्वम्। एतन्निरुक्तिरुक्ता। यथा, महाभारते ४। ४२। १८।

"न कुर्य्यां कर्म्म वीभत्सं युध्यमानः कथञ्चन।
तेन देवमनुष्येषु वीभत्सुरिति विश्रुतः॥")

अर्ज्जुनः। यथा,—

अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः।
वीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः॥
इति महाभारते। ४। ४२। ६॥

बुक्क, कि श्वादिशब्दे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-पक्षे अक०-सेट्।) पञ्चमस्वरी कोपधः। चुरादिपक्षे कथने भ्वादिपक्षे कुक्कुरादिशब्देऽयमिति रमानाथः। कि, बुक्कयति वाचा बहुलोकः। बुक्कति श्वा। इति दुर्गादासः॥

बुक्कं, त्रि, (बुक्कयति बुक्बुक् इत्यव्यक्तशब्दं करोतीति। बुक्क+पचाद्यच्।) वक्षोऽभ्यन्तरमांसविशेषः। तत्पर्य्यायः। अग्रमांसम् २ हृदयम् ३ हृत् ४। इत्यमरः। २। ६। ६४॥ केचित्तु बुक्कात् पृथगेव हृदयान्तर्गतमांसविशेषे पद्माकारे हृदयादिद्वयमाहुः। धातोरनेकार्थत्वात् बुक्काते स्वादुत्वात् स्वाद्यते बुक्कं बुक्क कि श्वादिशब्दे घञ्। नान्तः पुंलिङ्गोऽप्ययम्। स्त्रीलिङ्गोऽपीत्येके। इति स्वामी॥ बुक्का स्त्री बुक्कः पुमानपि। शोणितेषु स्त्रियां बुक्का बुक्कस्तु समये द्वयोरिति रभसात्। नदादित्वात् स्त्रियां बुक्कीत्यन्ये। बुक्कनान्तं क्लीवमव्युत्पन्नमिति रुद्रकलिङ्गादयः॥ उरस्यपि च बुक्कायां हृदयं मानसेऽपि चेति त्रिकाण्डशेषः॥ बुक्कशब्दस्य उकारस्य ऋकारादेशे तथैव वृक्कादिरूपञ्च। अग्रञ्च तन्मांसञ्चेति अग्रमांसं बुक्कस्याग्रं संमुखीभूतं मांसं बुक्काग्रमांसमित्येकं नामेत्यन्ये। इति तट्टीकायां भरतः॥

बुक्कः, पुं, (बुक्कयति शब्दायते इति। बुक्क+अच्।) छागः। इति त्रिकाण्डशेषः॥ समये पुं, स्त्री। इति रभसः॥

बुक्कनं, क्ली, (बुक्क कि श्वादिशब्दे+भावे ल्युट्।) कुक्कुरशब्दः। तत्पर्य्यायः। भषणम् २। इति हेमचन्द्रः। ६। ४३॥

बुक्का, स्त्री, (बुक्क+टाप्।) बुक्कम्। इत्यमरटीकायां भरतः। शोणितम्। इति रभसः॥

बुक्का, [न्] (बुक्क+कनिन्।) पुं, बुक्कम्। इत्यमरटीकायां भरतः॥

बुक्काग्रमांसं, क्ली, (बुक्कस्याग्रमांसं।) हृदयम्। इत्यमरटीकायां रायमुकुटः॥

बुक्कारः, पुं, (बुक्क कि श्वादिशब्दे भावे घञ्। बुक्कं निनादस्तस्य कारः करणम्। "एकवर्ग्यद्वयो यत्र मध्यमस्तत्र लुप्यते" इति न्यायात् मध्यस्थ ककारस्य लोपः।) सिंहध्वनिः। इति हारावली। १६४॥

बुक्की, स्त्री, (बुक्क+गौरादित्वात् ङीष्।) बुक्कम्। इत्यमरटीकायां भरतः॥

बुट, कि हिंसे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि बोटयति बोटति। इति दुर्गादासः॥

बुड, शि उत्सर्गे। संवृतौ। इति कविकल्पद्रुमः॥ (कुटा०-तुदा०-पर०-सक०-सेट्।) शि बुडति अबुडीत् बुबोड इति दुर्गादासः॥

बुद, इर् ञ उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुदत् अबोदीत्। ञ बोदति बोदते। उ बोदित्वा बुत्त्वा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

बुद्धः, पुं, (बुध्यते स्म इति। बुध+क्त। यद्वा भावे क्त बुद्धं ज्ञानमस्यास्तीति अर्श आद्यच्।) भगवदवतारविशेषः। स तु दशावतारान्तर्गतनवमावतारः। यथा,—

"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥

अञ्जनस्य सुतः। अजिनसुत इति पाठे अजिनोऽपि स एव। कीटकेषु मध्ये गयाप्रदेशे। इति श्रीधरस्वामी॥ तत्पर्य्यायः। सर्व्वज्ञः २ सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्तभद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९ जिनः १० षड़भिज्ञः ११ दशबलः १२ अद्वयवादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६ शास्ता १७ मुनिः १८। इत्यमरः। १। १। १३॥ धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधिसत्त्वः २२ महाबोधिः २३ आर्य्यः २४ पञ्चज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतुस्त्रिंशज्जातकज्ञः २८ दशपारमिताधरः २९ द्वादशाक्षः ३० त्रिकायः ३१ संगुप्तः ३२ दयाकूर्च्चः ३३ खजित् ३४ विज्ञानमातृकः ३५ महामैत्रः ३६। इति हेमचन्द्रः। २। १४६॥ धर्म्मचक्रः ३७ महामुनिः ३८ असमः ३९ खसमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३ अकनिष्ठः ४४ त्रिशरणः ४५ बुधः ४६ वक्री ४७ वागाशनिः ४८ जितारिः ४९ अर्हणः ५० अर्हन् ५१ महासुखः ५२। इति शब्दरत्नावली॥ महाबलः ५३। इति जटाधरः॥*॥ ईश्वरनिरूपणे बुद्धविशेषाणां मतमाह। सर्व्वज्ञ इति सौगताः। निरावरण इति दिगम्बराः। लोकव्यवहारसिद्ध इति चार्व्वाकाः। शरीराण्येव चेतनानि गौरोऽहं जानामीत्यादिज्ञानेन गौरत्वज्ञानवत्त्वयोः सामानाधिकरण्यानुभवादिति चार्व्वाकाणां मतञ्च। तेषां मते जगतः क्षणभङ्गुरत्वं नन्वस्तु क्षणभङ्गः पूर्व्वपुञ्जाच्चोत्तरपुञ्जोत्पत्तिस्तथा च पुञ्जनिष्ठ एव कुर्व्वद्रूपत्वाख्यजातिविशेषः स्मरणजनकतावच्छेदक इति न दोषः। इति कुसुमाञ्जलिप्रथमस्तवकटीकायां रामभद्रः॥*॥ बुद्धानां दशविध मतभेदमाह।

"वदन्ति पुत्त्र आत्मेति १ दृढ़प्राकृतबुद्धयः।
देह आत्मेति २ चार्व्वाका इन्द्रियाण्यपरे ३ च ते॥
तेऽन्ये प्राण ४ स्ततोऽन्ये ते मन ५ आत्मेति वादिनः।
बुद्धिरात्मेति ६ बौद्धा वै शून्यमात्मेति ७ तेऽपरे॥
याज्ञिका यज्ञपुरुषं सर्व्वज्ञं ८ सौगता विदुः।
निरावरण ९ माहुर्यं दिगम्बरमतानुगाः॥
चार्व्वाकाश्चापि लोकानां व्यवहारप्रसिद्धकम् १०॥"
इत्यात्मप्रकाशः॥*॥

पण्डितः। बुधिते, त्रि। इति मेदिनी। धे, १०॥ (बुद्धावतारस्य विवरणं यथा,—

इह खलु बौद्धशास्त्रसमूहेषु सम्प्रोक्ताः पञ्चविंशतिर्बुद्धा दृश्यन्ते। तेषां शुद्धोदनौरसात् मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्कबन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽन्तिमतमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरे कलेश्चतुःशतषड़शीत्यधिकद्विसहस्रमितेषु गतेष्वब्देषु शुक्रवासरे सुरद्विषां सम्मोहनाय साक्षाद्विवेकमूर्त्तिः स्वेच्छाविग्रहेण प्रादुर्बभूव।

अथ स वयसा सह क्रमेण शीलगुणसाहसरूपौदार्य्यबलवीर्य्यादिभिर्वर्द्धते स्म। उदिते यौवने पित्राज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं दण्डपाणितनयां गोपानाम्नीमनुमतामुपयेमे।

जननसमयेऽस्य गणकाच्छ्रुतवान् नरेश्वरः शुद्धोदनः व्याधिग्रस्तजराजर्ज्जरसन्न्यासिमृतजनदर्शनाज्जातवैराग्यः पुत्त्रस्ते गृहं सन्त्यक्ष्यतीति। तस्मात् सञ्जातशङ्को राजा शिल्पिभिरुपवनपरिवृतं सुगुप्तं रम्यं हर्म्म्यत्रयं भूभृषणं निर्म्मापयामास। तत्रासौ युवतीजनपरिवेष्टितसुपच्छन्दितं विषयविमुग्धचेतसं तनयं निवृत्तनिर्गमनम् स्वच्छन्देनान्ववासयत्। अथ गच्छति कालेऽस्य शिथिलीबभूव भोगसन्तर्षः। ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानास्थानं द्रष्टुमिच्छा सञ्जाता। ततः सोऽस्मै पित्रे शुद्धोदनाय सम्बोधयामास पर्य्यट्य नगरं प्रजानामृद्धिमवस्थाञ्च विलोकयितुं वासना मे बलवतीति। राजा प्रथमं निवारयितुमियेष प्रलोभनेन। स नैव तु ततो विरराम। अथ विज्ञाय निर्बन्धं पुत्त्रस्य मन्त्रिणमादिदेश, कुमारे शाक्यसिंहे भ्रमितुमारब्धे राष्ट्रे मे जरातुरसन्न्यासिमृतमानवाः केनापि कारणेन राजवर्त्मनि नोपतिष्ठन्तामिति विघोषयेति। तथानुष्ठिते कुमारः रथमारुह्य